| छन्दसां वृत्तिनामानि । | छन्दसां लक्षणगणाः । | छन्दसामुदाहरणानि । |
|---|---|---|
| अचलधृतिः | द्विगुणितवसुलघुभिरचलधृतिरिह<br>।।।।।।।,।।।।।।। | तरणिदुहितृतटरुचिरतरवसति-<br>रमरमुनिसुखजनविहितधृतिरिह ।<br>मधुरिपुरभिनवजलधररुचितनु-<br>रचलधृतिरुदयति सुकृतिहृदि खलु ॥ |
| गरुड़रुतम् | गरुड़रुतं नजौ भजतगा यदा सुखदा<br>।।।,।ऽ।,ऽ।।,।ऽ।,ऽऽ।,ऽ | अमरमयूरमानसमुदे पयोदध्वनि-<br>र्गरुड़रुतं सुरारिभुजगेन्द्रसन्त्रासने ।<br>धरणिभरावतारविधिडिण्डिमाडम्बरः<br>स जयति कंसरङ्गभुवि सिंहनादो हरेः ॥ |
| धीरललिता | संकथिता भरौ नरनगाश्च धीरललिता<br>ऽ।।,ऽ।ऽ,।।।,ऽ।ऽ,।।।,ऽ | |
| अश्वगतिः | पञ्चभकारयुताऽश्वगतिर्यदि चान्त्यगुरुः<br>ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ | |
| मणिकल्पलता | नजरभभेन गेन च स्यान्मणिकल्पलता<br>।।।,।ऽ।,ऽ।ऽ,ऽ।।,ऽ।।,ऽ | |
| रूपम् | यस्मिन् सर्वे गा राजन्ते अष्टाद्यं तद्रूपं नाम<br>ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ | |
| वरयुवतिः | भो रयना नगौ च यस्यां वरयुवतिरियम्<br>ऽ।।,ऽ।ऽ,।ऽऽ,।।।,।।।,ऽ | |
| सप्तदशाक्षरा वृत्तिः । अत्यष्टिः । | | |
| शिखरिणी<br>षष्ठे एकादशे च यतिः । | रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी<br>।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽ।।,।,ऽ | करादस्य भ्रष्टे ननु शिखरिणी द्रक्ष्यति शिशो-<br>र्विलीनाः स्मः सत्यं नियतमवधेयं तदखिलैः ।<br>इति त्रस्यद्गोपानुचितनिभृतालापजनितं<br>स्मितं बिभ्रद्देवो जगदवतु गोवर्द्धनधरः ॥ |
| पृथ्वी<br>अष्टमे नवमे च यतिः । | जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः<br>।ऽ।,।।ऽ,।ऽ।,।।ऽ,।ऽऽ,।,ऽ | दुरन्तदनुजेश्वरप्रकरदुःस्थपृथ्वीभरं<br>जहार निजलीलया यदुकुलेऽवतीर्य्याशु यः ।<br>स एष जगतीगतिर्दुरितभारभक्ताद्दृशां<br>हरिष्यति हरिः स्तुतिस्मरणचाटुभिस्तोषितः ॥ |
| वंशपत्रपतितम्<br>वंशदलमिति शम्भौ वंशपत्रपतिता<br>इति केचित् । अस्य दशमे सप्तमे<br>च यतिः । | दिङ्मुनि वंशपत्रपतितं भरनभनलगैः<br>ऽ।।,ऽ।ऽ,।।।,ऽ।।,।।।,।,ऽ | नूतनवंशपत्रपतितं रजनिजलवं<br>पश्य मुकुन्द ! मौक्तिकमिवोत्तममरकतगम् ।<br>एष च तं चकोरनिकरः प्रपिबति मुदितो<br>वान्तमवेत्य चन्द्रकिरणैरमृतकणमिव ॥ |
| मन्दाक्रान्ता<br>अस्याश्चतुर्थे षष्ठे सप्तमे च यतिः ।<br>इयं दौत्यवर्णनोपयोगिनी शस्ता । | मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्<br>ऽऽऽ,ऽ।।,।।।,ऽऽ।,ऽऽ।,ऽ,ऽ | प्रेमालापैः प्रियवितरणैः प्रीणितालिङ्गनाद्यै-<br>र्मन्दाक्रान्ता तदनु नियतं वश्यतामेति बाला ।<br>एवं शिक्षावचनसुधया राधिकायाः सखीनां<br>प्रीतः पायात् स्मितसुवदनो देवकीनन्दनो नः ॥ |
| हरिणी<br>षष्ठे चतुर्थे सप्तमे च यतिः । | नसमरसला गः षड्वेदैर्हयैर्हरिणी मता<br>।।।,।।ऽ,ऽऽऽ,ऽ।ऽ,।।ऽ,।,ऽ | व्यधित स विधिर्नेत्रं नीत्वा ध्रुवं हरिणीगणाद्-<br>ब्रजमृगदृशां सन्दोहस्योल्लसन्नयनश्रियम् ।<br>यदयमनिशं दूर्वाश्यामे मुरारिकलेवरे<br>व्यकिरदधिकं वक्राकाङ्क्षि विलोलविलोचनम् ॥ |
| नर्द्दटकम् | यदि भवतो नजौ भजजला गुरु नर्द्दटकम्<br>।।।,।ऽ।,ऽ।।,।ऽ।,।ऽ।,।,ऽ | व्रजवनिता वसन्तलतिका विलसन्मधुपं<br>मधुमथनं प्रणम्रजनवाञ्छितकल्पतरुम् ।<br>विभुमभिनौति कोऽपि सुकृती मुदितेन हृदा<br>रुचिरपदावलीघटितनर्द्दटकेन कविः ॥ |
| कोकिलकम्<br>अस्य सप्तमे षष्ठे चतुर्थे च यतिः । | हयऋतुसागरैर्यतियुतं यदि कोकिलकम्<br>।।।,।ऽ।,ऽ।।,।ऽ।,।ऽ।,।,ऽ | लसदरुणेक्षणं मधुरभाषणमोदकरं<br>मधुसमयागमे सरसकेलिभिरुल्लसितम् ।<br>अलिललितद्युतिं रविसुतावनकोकिलकं<br>ननु कलयामि तं सखि ! सदा हृदि नन्दसुतम् ॥ |